भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमाला-३७

# व्याकरणदर्शनस्य दर्शनान्तरैः सह तुलनात्मकमध्ययनम्

जगदीश प्रसाद मिश्रः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# आमुखम्

वेदाङ्गत्वेन प्रसिद्धस्य सर्वशास्त्रोपकारकस्य व्याकरण-शास्त्रस्य दर्शनत्वं प्रतिपादयामासुः वैयाकरणाः विद्वांसः। परमतत्त्वप्रदर्शनार्थं प्रवृत्तानि शास्त्राणि खलु दर्शनानीत्यभिधीयन्ते। वैयाकरणैः परमतत्त्वत्वेनाभिमत-शब्दब्रह्मप्रतिपादकशास्त्रत्वेन दर्शनलक्षणमत्र युज्यत इति एतस्य शास्त्रस्य दर्शनत्वेन व्यावहारे न विप्रतिपत्तिर्वरीवर्ति। व्याकरणदर्शनस्य प्रसिद्धैः दर्शनान्तरैः न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्तैः सह तुलनात्मकमध्ययनं कृत्वा श्रीजगदीशप्रसादमिश्रमहोदयः ग्रन्थमिमम् अलिखत्। अष्टसु अध्यायेषु प्रविभक्तेऽस्मिन् ग्रन्थे दर्शनपरिचयः, व्याकरणस्य दर्शनत्वम्, ब्रह्म, माया, जीवात्मा, जगत्, सृष्टिर्मोक्षश्चेति दार्शनिकविचारबिन्दवः क्रमशश्चर्चिताः।

दार्शनिक विचाराणां सङ्ग्रहात्मकः समीक्षात्मकश्च एष ग्रन्थः राष्ट्रियसंस्कृतसंस्थानस्य भारतस्वातन्त्र्यस्वर्णजयन्तीग्रन्थमालायां सप्तत्रिंशत्तम-पुष्पत्वेन विकसतीति भृशं मोदमनुभवामि। ग्रन्थोऽयं विदुषां तोषाय, छात्राणां ज्ञानवर्धनाय जिज्ञासूनामुपकाराय स्यादित्याशासे।

सन्दर्भेऽस्मिन् ग्रन्थलेखकाय श्रीमते जगदीशप्रसादमिश्रमहोदयाय कृतज्ञताः समर्प्यन्ते। ग्रन्थस्यैतस्य प्रकाशनकार्यं निरूढवते शोध-प्रकाशनविभागस्य सहायककुलसचिवाय डा. प्रकाशपाण्डेयाय शोधसहायिकायै श्रीमती-छोटीबाईमीणायै च साधुवादाः प्रदीयन्ते। समये ग्रन्थस्य योग्यं मुद्रणं कृत्वा प्रदत्तवते अमर मुद्रणालयाधिपतये श्रीहीरालालाय धन्यवादं व्याहरामि।

संस्कृतसेवकः

**वेम्पटि कुटुम्बशास्त्री**

# विषयानुक्रमणिका

(न्याय–वैशेषिक–सांख्यं–योग–मीमांसा–वेदान्त–जैन–बौद्ध दर्शनानि दर्शनान्तरबोध्यानि)


| | | पृष्ठ–संख्या |
|---|---|---|
| भूमिका | | १–१४ |
| प्रथमोऽध्याय: | दर्शनपरिचय: | १५–२६ |
| द्वितीयोऽध्याय: | विभिन्नदर्शनेषु तथा व्याकरणदर्शने ब्रह्ममीमांसा | २७–६० |
| तृतीयोऽध्याय: | विभिन्नदर्शनेषु मायाविषयकविचारस्तथा व्याकरणदर्शने कालशक्ति: | ६१–६९ |
| चतुर्थोऽध्याय: | विभिन्नदर्शनेषु तथा व्याकरणदर्शने जगत् | ७०–८८ |
| पञ्चमोऽध्याय: | विभिन्नदर्शनेषु तथा व्याकरणदर्शने जीवात्मविचार: | ८९–१२५ |
| षष्ठोऽध्याय: | विभिन्नदर्शनेषु मुक्तिस्तथा व्याकरणदर्शने मोक्ष:, वाक्तत्त्वं च | १२६–१५९ |
| उपसंहार: | | १६०–१६४ |
| सहायकग्रन्थसूची | | १६५–१६९ |

चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति।[१]

पुनश्चाग्रे भाष्यकार आह –

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि – तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुंक्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उतत्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवोऽसि वरुणेति।[२]

इत्थं व्याकरणस्य पुनरपि बहुविधानि प्रयोजनानि महर्षिणा पतञ्जलिना निद्रिष्टानि। तेषु स्पष्टप्रतिपत्त्यर्थं निदर्शनरूपेण कानिचिद् विविच्यन्ते। तद्यथा–

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**

**दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्।**

अनेन भाष्यकारवचनप्रामाण्येन दुष्टशब्दप्रयोगे महान् दोषोऽतो दुष्टाः शब्दा न प्रयोक्तव्या इति सुनिश्चितम्। 'इमे शब्दा दुष्टाः' इति ज्ञानं तु व्याकरणज्ञानाधीनमेव। अतो व्याकरणाध्ययनमावश्यकमिति भाष्यकाराणामभिप्रायः।

इदमपि ध्यातव्यं यद् यथा महाभाष्ये महर्षिणा पतञ्जलिना दुष्टशब्द प्रयोगे महान्तो दोषा उक्तास्तथैव साधुशब्दप्रयोगे बहवो गुणा अपि निगदिताः। तद्यथा –

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥**

---

१. पात.म.भा., पस्पशा.

२. पात.म.भा., पस्पशा.



## राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली